अलका



—केशवचन्द्रः

प्रणेता —

विद्वन्मणिः केशवचन्द्र दाशः

प्राध्यापकः

श्री जगन्नाथ संस्कृतविश्वविद्यालयः

पुरी ७५२००१

प्रकाशिका —

लोकभाषा प्रचार समितिः,

वड़ ओड़िआ मठः,

पुरी- ७५२००१

प्रथम संस्करणम्—

१९८६

मूल्यम्—

रू १०/-

मुद्रकः—

श्री नारायण प्रेस्

बालिसाहि, पुरी ।

(प्रकाशिकया सर्वस्वत्वं स्वायत्तीकृतम्)

समर्पितम्

त्वयि

—केशवचन्द्रः

In this Book

Alakā, the symbolic title is borrowed from Meghadūtam with the very essence of love and beauty. This represents the human scheme of desire through a feeling of deep sorrow born out of worldly concerns. It begins with a desire for desirelessness. It invokes the potential peceability within its purview to have the foretaste of the bliss.

Moreover, it propounds a theory of 'you' to mean 'everything within' personifying 'it' as a Sahayātrin 'co-goer' which is ultimately reduced to its substratum and identified as 'Alakā' —— an ideation of eternal mirth.

अरालाकवरी

निशाहासो विकसति तारकालपने
गीतिर्लयमाहरति सीमन्तिनीस्वरे
अलसीभवति पुनः बालस्य विलापः
प्रहरस्य संकीर्णझंकारे.....
प्रकाश आयाति सत्यम्
तथापि न विलोक्यते मुखम् ,
अनादिरादिमन्विष्यति
पिहितमन्दिरस्य सम्मुखचत्वरे ।
संसारो निमज्जति स्वयम्
अवैखरीलीलामालिकासु
हास्यं यथा चुम्बिष्यद्धरे
त्वमवभाससे तदा
मिलनस्यं पूर्वसमाहारे
प्रहरस्य संकीर्णझंकारे... ..
अतः पल्वलस्य जलमिह जलम्
प्रणालस्य प्रवाहोऽपि जलम्

सागरस्य तरङ्गोऽपि जलम्
तटिनीनामावर्त्तं च जलम्
सर्वं समीकृत्य सोऽहं जलीयकाकलिः
रङ्गहीनप्रतिध्वनिः तव कुञ्जद्वारे
यथा काचित् नीरवता
निःसहायनिशिकान्तोदरे ,
अन्विष्यामि नमस्कारं मम
विदूरस्य अदूरीयस्तरे
आचारे विचारे पूर्वपरिचारे ।

मूल्यम्

ऊर्णनाभिजालमिव

अस्थिमत्तो जीवः

मनाक् प्रीतये मनाक् शान्तये च

आत्मनि गोष्पदानां निर्माणे विव्रतः

मूल्ययाचञ्चातले—

तथापि श्रमिकः तथापि पथिकः ।

इह तु मूल्यं विना न मिलेत् किमपि

यदि वा प्राप्तव्यम्

तर्हि अधिकं हातव्यम्

यदि वा कर्त्तव्यं किंचित्

तथा च दातव्यम्

विवाहो वा विभूतिर्वा

सम्मति र्वा सम्भूतिर्वा

सर्वत्र मूल्यमेव, मूल्यमपेक्ष्यते ।

नीरवता...नीरवता...

नीरवभाषैव मधुरा धरायाम्

अतोऽहं नीरवः

नीरवोऽहं तवैव निकटे

त्वं बुध्यसि सम्मतोऽहं

तव सुवचने.....

केयं रीतिः... ?

किमर्थमादित्यचरित्रे विच्युतिः ?

अनावश्यकः...अनावश्यकः...

अनुरागशून्योऽयं संपर्कः ।

विगलिता मासाः

चन्द्रोऽपि विश्रान्तो वंशवनतले

कुमुदिनी आर्द्राऽभूत् हेमन्तसलिले

अहो... अहो... मनोहरम्

शीतार्तनगरम्..... ।

को वा इदमवगमिष्यति ?

को वा मूल्यं प्रदास्यति ?

अर्कशाखाक्षीरलग्न पतङ्गस्य पक्षे

मृत्युः स्थितिमान् भवति मदग्रे
एकस्मिन् सहिष्णुप्रहरे
कैशोरस्य हासे अद्य
शोष एव अनुप्रासायते
निरीहलहरीणां लयम्
अद्य मम परिचयः
आवाहनस्य मूल्यनिमित्तम्
आलोडनं भवति सर्वदा
पुनश्च प्रतिमाहृदये
अनुरागस्य मूल्याय च
शोभनचित्रमिच्छति
कलसी स्वदेहे ।
मूल्याय प्रस्तुताः सर्वे—
मृत्तिकाया गर्भाशये
प्रकाशस्य मूल्यं दातुं प्रस्तुताऽपि
अङ्कुरस्य हरितलहरी..... ।
परन्तु प्रत्यावर्त्तने
अहम् अप्रस्तुतः.....

मूल्यामूल्ये न तात्पर्यं मम
भस्म भ्रश्यति यथा वह्निपरिचयम्
भग्नातरो हारितवती मे
निजत्वे तथैव संशयम्
परिमाप्य त्वयि सामुद्रिकलयम् ।
इतो विशालसमुद्रे सर्वं समुदयम्
सर्वं समुदयं पुनः सर्वं च अद्वयम्
त्वमिह हि मूल्यं मम
त्वमेव अमूल्यम् ।

वयस्कप्रणवः

पथिकस्य अशुभनिश्वासे
नदीतल्पे शेते विषण्णदिगन्तः
आक्रमते क्रमानुसारेण
उपोषितकीटस्य विकटकटूक्तिः
क्व चरणं ? क्व च वा सरणिः ?
क्व वा दूरमयी आत्मीया अवनी ?
संकल्पे मे नितरामनल्पः
जीवनधारायाः सुलभविकल्पः
अनभिज्ञशरीरतो मम
मनो विगलति
यथा कश्चिद् वयस्कप्रणवः
वृत्तित्यक्तब्राह्मणस्य मुखात् ।
क्व यामि ? किं वा मृगयामि ?
त्वामेव संग्रहीतुं केवलमिच्छामि

यथा समीरणमाहरति कुसुमसुरभिम्

प्लवितुं...प्लावयितुं...सम्बोधनताले ताले

निजान्तराले...स्वकूले.....अनुकूले ।

क्व यामि ? कं वा बोधयामि ?

शब्दः समाप्यते —

शब्दः समाप्यते सत्यम्

आकाशस्तु असमाप्तः

तस्मिन्नपि त्वदर्थमनुदिनम्

अहं च प्रशस्तः

अहमपि शान्तिश्वासः

आलिङ्गने मम

अहं च ममैकनिवासः

स्वयं सहचरः, स्वयं सहवासः

मधुमन् मे परायणम् ।

मधुमन् मे पुनरायणम् ।

नीलकण्ठः

कस्त्वमाकारयसि
विनश्य शस्यभूमिं मम
उद्यानपादपांश्च
निष्पर्णीविधाय..... ?
कस्त्वमाकारयसि पुनः
आत्मीयप्रतिश्रुतिषु
गरलं पाययन् ?
त्वया तु संजातोऽहम्

निद्रालुनीलकण्ठः
तथापि कथं पश्चात्सम्बोधनम्
किमर्थं मद्दृष्टियाचनम् ?
किमवशिष्यते वा मयि ?
द्यूतखेले विनियोक्तुं किमिच्छसि
अस्थिखण्डानि मे..... ?

अहं तु पर्यटामि अलकामन्विष्य
मच्चरणरुधिरेषु
पर्वतान् स्नपयन् ।
मदर्थं तु अपेक्षते
कणमितवह्निः
विन्दुमितं शीतलं जलं च
विधातुं तृतीयनयनम्
संस्कर्तुं च फेनिलस्पन्दनम्

मण्डूकः

शृणोतु वा न शृणोतु कोऽपि
अहं भरामि स्वरं ममैव संगीते
विषादं च नवीकृत्य
निजाभिषेकमाङ्गलिकैः
यथा कश्चिन् मण्डूकः
सोपानतलस्य— ।
अद्य तु प्रश्निलशिशुर्मे
निर्विकारमुत्तरमिच्छति ।
तमहं बोधयितुं न शक्नोमि
विकसति नलिनी वा केनप्रकारेण
कीदृशं वा वल्लीतो विगलति मल्ली
प्रातः गीतिकायाम्
किमर्थं वा मन्दिरमिदम्
इयदुच्चतरम्.....
स्मृतये वा प्रतिश्रुतये वा ?

अहं तु संकीर्णः, परम्.....

तस्य काम्यो ममैव प्रसारः

अहं निरुपायः, परम्.....

तस्य सकलकेलिर्मे

नीरवस्वीकारः.....

तदर्थं च समाधानम्

मदीयलोतकम्

मदीयनिश्वासः.....





भयशैली

भयं समायाति
मन्दिरे वृन्दारक इव
स्पन्दनं सुन्दरीकुर्वन्
शरदिव आषाढनिशीथे ।
मम गन्ध उत्तिष्ठते
तोषमतामभिनन्दनतो
मन्दारस्य सौन्दर्यमिव
अन्धवीथितले— ।
ततो यात्रापथे .....
पत्रघूर्णिः भवति प्रतिभूः
प्राक्तनजन्मनः प्रसिद्धदुष्कृतेः
अपचितचरितस्य परनिश्वासेषु
अविश्वासः रुणद्धि रणस्य प्रेरणाम्
सन्देहेषु निद्रा दरिद्राति ।

अन्धवीथिसन्धितश्च

भयं समायाति.....

पुंस्कोकिलरुतमिव

शीतान्तप्रभाते—

अभियोगो विलीयते

सिंहासनतले .....

न्यायप्रतीक्षायामायुः समाप्यते

निपुणता विलुप्यते उपाधिविरहे

अवचनं लोचनानि सलिलीविधत्ते

पुनर्भयं समायाति.....

आसन्नप्रसवाया विकृतिरिव

मरणदर्शकस्य विषण्णवदने

छलयितुं ज्वलयितुम्

पदे पदे विफलीविधातुम् ।

सहसा हसति साहसी कश्चित्—

'त्वम्' एव हि भयायसे मयि

लयमिव गीतिकायाः

जयमिव चौर्यजीविकायाः

— —

मृगया

उन्मुक्तेऽसिन् तव कुञ्जद्वारे
सुशोभते किशोरीणाम्
अप्रकटदेहः
यत्र न किमपि विद्यते
अर्थवद् विधातुम्
समन्वयन् निजपरिचितैः
सुप्रियमक्षरम्
यन्मां पृथक्कृत्य
त्वन्नूपुरनिक्वणे निर्लीनम् ।

व्यूहः

मध्याह्नं विरमति चतुष्पथे
विनिश्चेतुं कार्यालयमार्गम्
त्वत्क्रमलममलयन् मृगयति
निजमिश्ररागम्..... ।
तथापि सर्वत्र ज्वलनस्य दृश्यम्
'अलका' मथ्नाति तदेव रहस्यम्
तत् समीरणं तथा च अस्पृश्यम्



तथापि कातरः

मार्गमहं विस्मृतवान्
पौरुषं मे उद्दीपयन्
क्लीवस्त्वमिह पुमर्थ इति
असकृज्जानन्नपि
अहमद्य अभिशप्तः ।
एतदर्थं तथापि आश्वस्तः—
नयने मे निरुत्कण्ठनिद्रा
हृदये उद्वेगः शीतलः
वाध्यसमाधानं पुरः
प्रश्नो मे शिथिलः ।
सर्वतः तप्तवायुः शोषयति अश्रु—
तथापि बोधयितुं न शक्नोमि
मञ्जीवनम् मज्जीविकाम्.....
मम च प्रत्यूषतारकाम्
अभिशापः केवलमिह
आक्रोशस्य रूपमिति ।

क्लीबोऽहं भवानि .....
विमूढदासश्च भवानि .....
इदं जीविकायाः अन्तरालम्
इदं च जिजीविषाफलम् ।
क्लीबत्वमपीह अधिकारः
मानवीय शरत् संविधाने,
काले काले तत्कालो विकलः.....
राक्षसस्य अक्षितले
अयमपि जीवनस्य खेलः ।
अहमद्य कियान्न कातरः
कियान्न विरही ..... ?
महागर्भमवमृशन्
आदिमपर्वतानां च
शृंगं विगणयन्
आषाढजलदस्य
सलिलविन्दवे..... ??

द्रष्टा

नास्ति मूलं नचाग्रम्
केवलं व्यवच्छिद्य
नरकीक्रियते इह
पादपस्य मध्यदेहः ।
सोपानद्वयमधः स्खलन्
पुनरारोहणमधिकं भवेदिति
विततचिन्तया
ते दतिलाः पाषाणतले
मद्रूपं विनष्टम्
आलवालजले..... ।
स्रष्टारस्तु द्रष्टारोऽत्र
नष्टारश्च विधातारः

एतेषां सकलविचारः
सर्वत्र विकलस्वीकारः ।
प्रतिक्षणं विलोमनं···विलोमनम्·····
निजरूपविलोमनम्·····
विवर्तनम्·····परिवर्तनम्
निजवाग् विपरिवर्तनम्·····
अयमद्य दर्शनस्य सारः
तदहमेतदां संसारः ।



निष्णातः

तैलदर्पणकङ्कतिकादिकं
सश्रद्धं समर्प्य
किंचित्काम्ये किंचिद्रम्ये
आत्मानं निष्णपयन्
अहमिह प्रवाहसर्वस्वः ।
नयनमुच्छलयन्
त्वन्मृदुकलासु
जीवनमुपभोक्तुमद्य
बुभुक्षां प्रार्थये
रेखीभूय कज्जलमञ्जूषायां तव ।
जानेनाऽहम्.....
कियद्दूरमवशिष्टम्
बालिकाया धूलिगृहं विपुलीभवितुम्
तवान्तःपुरस्य प्रवाहो वा
कांस्कान् स्वरान् संभरति
शृंगारं मे मधुरीविधातुम् ।

शंखस्नानम्

प्रातः पूरयति अपराह्णम्
निजगीतिकायाम्
अस्ताकाशमेघरङ्गः
तोलयति नवछद्मवेशम्
तदर्थं चन्द्राङ्किता रजनी सुन्दरी
शब्दगर्भसागरेऽपि हृदीया लहरी ।
प्रशान्तवक्षसि सुखदुःखविनिमयः
प्रीतिशोणितेषु पुनः स एव प्रलयः ।
सर्वमेतन् मदर्थं तु कला
श्रमसस्यशाला.....
अत उषा नवा अभिज्ञता ।
पुलकेषु शब्दः तिरोहितः
अद्य हृदि गीतिकासंकेतः
परं गीतिर्मे व्यथा

यदि तत्र न ते अभिव्यक्तिः ।
चक्रवाकस्य नादलिपितले
न मे अभिलाषः कश्चित्
केवलं ते शङ्खजले
काम्यं सकृत् स्नानम्
आगामिप्रतिश्रुतये च
आवश्यकं पुनरेकं
मधुरस्पन्दनम् ।

वसुदेवः

तत्काराविहग इव
रामगिरिरमणकातरः
स्थलमन्विष्यामि
निह्नोतुं निजस्वं मे ।
न गोपपुरी दृश्यतेऽत्र
न वा कुञ्जदरी
इह तु वृक्षा दीर्घकायाः
शाखाश्च दुर्बलाः
चतुर्थीतिथीयचन्द्रे
केवलं वाणिज्यलाञ्छनम् ।
नक्तंचरनयने संप्रति
भारं वहन् प्रतिष्ठेऽहम्
मथुरातो व्रजेन्द्रनगरीम्

झराञ्जलिः

हुताशनशिखायां पतङ्गः
आवर्त्तस्य अनुरागे विलीनः तथापि
जिजीविषाया लोतकं निपीय ।
स्खलनं न पुनः विच्युतिः
न विलापो विलासविरहः
इतः, मुष्टिषु अङ्गुली शिथिला
न करे उष्णता
न वा शीतलता
केवलो विक्षेपः··· · केवलो विपर्ययः
शीतोष्णभावनासु
सारस्तु केवलोऽपचयः ।
करात् निर्झरति कलिः
प्लवते प्रवाहे
करस्तु निरुपायः—
नयनपुरतः पुनश्च
कलिः संप्लवते ।

अद्य विजमता यन्त्रणाश्रीमयी
रुग्णपरिवेशे तथापि
'त्वमेव' पुरातनमाया
जलमिव प्रवहसि
अतलम्.....वितलम्.....सुतलम्
नेत्रे च पत्रे च
नदे च जलदे च ।
अहं तु प्रसूनमेकं निपतन्
तवाञ्जलिपुटे.....विपर्यस्तः
अद्य करतो झरन् एकवारम्
विराममिच्छामि
चरणोपरि ते



चक्रवाकः

आकाश इव सदाऽहम्
त्वद्रजनी चक्रवाकः
सहस्रनयनं वहन् ।
पुरतो नदीयं व्यवधानमयी
वैखरी मे न त्वामालिङ्गति ।
परमपरपुलिने
श्रूयते स्वरस्ते ।
अहमिह निःस्वो निःसहायः
प्रसारय अञ्चलं ते
पञ्चीकृत्य अन्तर्वचनं मे
मामिह ललितीकुरु
अस्तरागे उदयो भवितुम् ।

चन्द्रसेनः

आकाशोऽवतरति
वलाहके बलाकायाः रतिं वहन्
वात्सल्यमङ्कुरयन्
मरालीनयने
गर्भवती भवति वनानी
पौषगीधूलिषु
कल्पनासु मसी मद्यायते।
काककृष्णधूमोदरे ततः
शीतार्त्तवह्निः निह्नूयते
मयि यथा विवस्त्रसर्वस्वम्।
मूरलीछिद्रेषु ततो मे
वार्धक्यं विश्राम्यति

यथा साहित्यं काव्यजीविकायाम्
यथा च संस्कृतिः प्राचीनकलायाम्
यथा वा नटीचरणेनूपुरम्
पाणिंधमसरणिश्च
भवति जीवनविवरणी.....
जानेनाऽहम्
समयः किं समाधत्ते
तथापि मासाः समायान्ति
ग्राहकत्वं नवीकर्तुं मम
त्वद्दतुप्रथमदिवसे...



दूर्वाजीवनी

दीपः प्रज्वलति
दीपोऽपि निर्वाति
तथापि कथारम्भो
न शेषमुपैति ।
वृद्धाया आत्मकथातले
त्वत्प्रतिफलनं विलुलीभवति
दूरे..... विदूरे.....सुदूरे.....
सात्त्विकीभवति तथापि
हरितदूर्वाया जीवनीव
तवाङ्गशृङ्गारशैली
शृङ्गारसाहित्यस्य मे
पदमञ्जरीषु

पञ्जीकर्त्तुमयुतयुगस्य
शरत्शुभाञ्जलिम्
तथापि भग्नांशस्य संरक्षणे
लोलुपोऽहं जरिष्णुप्रहरी
निजदुःखं निजाय निवेद्य
निर्वास्यतः प्रदीपस्य
शेषतैलबिन्दुरिव
स्थितिमात्रं कुञ्जीकुर्वन्
निजगुञ्जनेषु...



दूरेऽपि विरहे

विलापे मे निदानीभवति
त्वज्जीवननिर्दिष्टजीवाणुः
मम निरुपायस्थितिकल्पे
अवश्यप्रस्थानं ते
काकबन्ध्या रजनीव
मदर्थमेका विलोलचेतना ।
दूरेऽपि विरहे.....
न दूरीभवति दुरितम्
संसारस्य नश्वररेखायाम्
वयं हि संलग्ना बिन्दवः ।
तथापि न केलिः समाप्यते—
ऋष्यशृङ्गकरस्पर्शे मेघोऽवतरति
यस्मिन् कस्मिन्नपि मार्गे,
राजवधूनामिरन्ध्रे
अन्धायते कलहंसध्वनिः
जनबहुलनगरेऽस्मिन् पुनः

पुनरपि देहो मार्गयिते ।
त्वामनुवदन् बहुविधम्
निजविप्लवसुगन्धिषु
झरत्कुसुमवृन्ते च
फलस्य विधूननमिव
विमन्थनं समन्त्रीकरोमि
स्थितये···संप्रीतये··· ।
दौर्बल्यं प्रवहति
रौद्रलोलकरूपेण
संकेतमुखयोरन्तराले
कालस्तु किंचिल्लुप्तः
किंचिन् मुक्तः····· ।



हंसगीतिः

नयनेऽवतरति न काऽपि नगरी
न वा मन आलिङ्गति सुसौम्या नागरी।
पुरस्तु निर्माप्या सरणिः सुन्दरी
तत्र च विशालशाल्मली
पुनः निष्पक्वा बदरी..... ।
मृगजले लुल्यमाना शुभविभावरी
रसापिपसाविवशा मयि यायावरी।
पिप्पलेऽस्मिन् एकाकिनी वायसी ईश्वरी
आकृतिमती सा केवलशर्वरी।

न कोऽपि आत्मीय इह न वा कोऽपि परः
सर्वस्य पिहितद्वारे त्वमेव संसारः
दन्ततले लेलिह्यते तवाधरशैली
हासे रहस्यमश्नुते कपोलस्थली ।
अलसनयने आशानिशा आलम्बिनी
बलिबन्धे च मेखलावेलाविलम्बिनी ।
त्वं तु सैव शुभ्रभरा सैव पुरातनदरी
अरुणकेलिकलापेषु सुरतशङ्करी ।



तथापि अहल्या

अमावस्यानिशाशेषे
रतिक्लान्तसहस्राक्ष इव
अहमन्विष्यामि मम
कवचकुण्डलादीनि .....
क्व मेघः ? क्व च वारिधारा .....
आकाशेऽस्मिन् क्व हरितिमा ?
सर्वत्र तु पाषाणी अहल्या
स्थिरा.....स्थविरा.....बर्बरा.....।
उर्वरपर्वतेऽद्य धुनिधूमायते
सम्बोधनं विगिलति गुहा,
स्वदेहस्वादाय राहुः तपस्यति
मोहिनी न वितरति सुधाम्

मन्दरस्तु मन्दायते हलाहलभिया
शेते सदाशिवः शवसरणिषु ।
तरुवरे पुष्प्यन्ति छत्रकाः
आषाढमण्डूकानां……
सरीसृपो रावो ह्रस्वतमः
नीलयामाकेलिः अलसो भवति
जीवने तथापि विपत्तिर्नापैति ।
सहस्रधारायाः रङ्गः
ष्ठीवनं ते संक्रमते
तवाश्रुणि व्याधिर्विधीयति

दुर्गम्या भवति अलकासरणिः ।
तथापि चपुपार्श्वे अलकायाः
अहल्यालहरी बुद्बुदमयी
आयाति……प्रयाति त्वत्तो मत्पर्यन्तम्
पाचकीयरतिषु च
उषरं शिशिरीकरोति
जागृतये……
पुनर्जागृतये……

नीलिमा

निजत्वं त्यजति चन्द्रः
सागरगगनयोर्नीलिमसंगमे
ततस्तु निखिलं नीलम्
रजनी च जनयति नीलम्
अरुणा त्वं नीलाम्बरी संजायसे
मन्नयने पुनः.....
न ज्योतिरुदेति मदर्थम्
न वा प्रातः प्रत्यायाति सकृत् ।
अहं तथा तवद्वारे
यथा कश्चित् स्वयंवरो भिक्षुः
समन्वेति निजभिक्षापात्रम्
उदरपरिधिना समम्
एको याति, एक आगच्छति ।
अस्मादेव नीलवलयतः
अनलस्य अनुभवं वहन्
कस्य वा गुरुत्वं कियत्.....?

मधुयामा कस्य वा साक्षिणी ?
मधुशय्यास्वादः क्व वा मृदुः ?
विगलति पुरतः प्रवाहः
स्तोकनम्रविलापसप्ताहः
अवलेहे स्वादो व्युदस्यते ।
देवाय प्रदत्ता आहुतिः
मामेव प्रपद्यते पुनः
ममात्मनि तद्भावं तनुते
तथा च ममकारे
त्वमेव वितुषीभवसि
नीलेऽस्मिन् अनिलरूपेण

पादमितभूमिः

नाऽहं पिता, नाऽहं पतिः
नेच्छामि वा मम अधिकारे
आधिपत्येऽथवा.....
आलुलायितकिशोरजलदस्य
आभिजात्ये किं वा.....
त्वं सदा ज्वालामनुभव
वामनीभव वा चिराय ।
न भव करुणसूर्यास्तविभा
न भव नीलकुमुदस्य लोतकीयशोभा ।
प्रतिपदमपेक्षते पादमितभूमिरिह
एतदर्थं प्रतिक्षा तवैव
त्वमेव हि औदासीन्ये मम
मनाक् उत्तेजना ..... ।
अत्र तु केवलमवयवसमवायः
अभेदावयवे च
स्वस्तिमान् अहं नृत्यशीलः

अतः सर्वं क्रियाहीनम्
सर्वं च निष्क्रियम्
सर्वं पुनः अवयवसंयोगे श्रीमयम्
ममज्ञाने तवेच्छायाम्
सर्वमद्वितीयम्— ।
पुनश्च ममान्तःकरणे
मन्त्रमयः कश्चित्
मग्नो निजसम्बोधने ।



तरुतारा

बुद्बुदानां मृदुविश्वे
अहं तु क्लान्तयायावरः
मरणस्य आमृणमुन्मोच्य
निर्वाणस्य मार्गं ध्वजयामि
यतङ्गस्वप्नेषु..... ।
ग्रामपथगगने तु एकाकिनी तारा
मन्नयने वामनीभवति
प्रसारयन्ती तस्याः प्रथमचरणम्
मां पुनः पुण्यवान् विधातुम्
त्वं तु तथापि चित्रम्
ऊर्ध्वमूलमधःशाखम्
अहं च तरुभक्षी पक्षी
चञ्च्वग्रे जनयामिक्रियाम्
आभिहननेन..... ।

हानं न अभिहननं मे
अहं हि भक्षयामि.....
विषाक्तकीटपटलानि
त्वयि..... ।
तथापि घूर्णिनिमित्तम्
सागर इव... ....
अहमभियुक्तः त्वन्निकटे
स्वयं निकषामयः— ।



अलकापथिकः

अङ्गनस्य अङ्गरागे
अनङ्गस्य रागो नागेश्वरः—
मेघकथां न पृच्छ माम्
अहं हि स्वयं दूतो मम नगरस्य
अहं च स्वयं प्रभुः न कस्य किङ्करः ।
न कदा नयनपथे त्वाम्
गोचरीकृतवान् इति
तव स्थितिरनुपस्थितिर्वा
मयि कमनीया समानरूपेण,
अतो मम देहे जटाधरः
आदिमोऽयमादरस्य धारः ।
सर्वत्राऽद्य दीपावली—
त्वद्द्वारे तु आरण्यकनिशा

अन्तराले पथिकस्य मम
अनुज्ञप्रणये……
शरज्ज्योत्स्ना तवापि क्वोष्णा ।
अहं तु आगतः ज्वलनाय इह
ज्वलिष्यामि वर्तिं न विकुर्वन्……
रहसि……रहसि……
अद्वयीसत्ताऽहं तव
ऋतुसुमनसि……

विषुवसंक्रान्तिः

क्षणाय श्राम्यति निदाघपूर्वाह्णम्
स्नानपूतजननीचरणयुगले
पिप्पलमूलेऽस्मिन् छायाशीतले ।
शाखाबद्धलघुकलसीतो
बिन्दूभूय जलं निर्गलति
सीमन्तिनीकामनायाम्
रूपमूलानि पुनर्मूलयितुम् ।
पूजा वीजायते ततः तुलसीशरीरे
धूपगन्धे संध्यायते कर्त्तव्यविनोदः
नमस्कारे ऊह्यते च
सकलमैतिह्यम् — ।
अश्रु विदलति निदाघीयव्यथाम्

उत्पत्तिचिन्तायां ज्योतिष्मान् भवति
कश्चिद् विभुरूपिपरमपुरुषः,
पिपासुपथिकस्य तृषा विषायते ततः
मध्याह्नमायाति शिथिलकूजने ।
अर्पयति जलानि सरसी
छायाधारे तपनस्य करे
यथा काचित् लज्जाशीला सुललिता
जलयाच्चातले.....
कुण्ठाकुले.....
अवगुण्ठनस्य लहरीताले ।
जननी निवर्त्तते पिप्पलमूलतः

अम्भशून्यकुम्भस्य जृम्भया सह
जपं जपं मङ्गलस्य मालाम्
अपराह्णं परायते ततः
चराचरपरिणामधारे
विषुवप्रसूने वयः संक्रमते,
जपमाला दोलायते कमण्डलुगले ।
तथापि जलं विगलति
निगलति निरर्गलम्
यावन्न मूलं सलिलितम्
यावन्न स्वयं च समाप्तम् ।

वीथिविपणी

किं वा आगामिष्यति
जीवनेऽस्मिन् पुनः
दौर्बल्यमायाति नारीवसनेषु
वैफल्यमायाति आत्मीयग्लानिषु
भव्यमभ्युपैति उष्मनिश्वासेषु ।
न कटाक्षे वृक्षायते प्रीतिः
राक्षसस्य वक्षसि केवलम्
आलिङ्गनप्लुतिः
पदे पदे इयमनुभूतिः
इयं च सभ्यस्य विभूतिः
गर्भलोभे टिट्टिभो इव
गगनतः तारका स्खलति

अन्तिमता प्रददाति
प्रियाप्रियसूचीम्
पूर्णता दुर्गन्धायते
वीथिमृतकुक्कुरशरीरे
मन्दमतिराजपुत्रो बन्दीभवति
व्याधपरिवारे.....
प्रतिश्रुतिः मिथ्यायते दूरस्थपल्वले
अभिप्राये मिलनं मलिनीभवति ।
महात्मनां वचनानि समायान्ति पुनः
एकीभवन्तीह एकमेकम्
खले कपोतमिव
दरस्वरे दुःखानि व्याहर्तुम् ।

घृणाप्रियः

इह तु विलापस्य परमाणुः
मामन्वेषयति
प्रारब्धकर्म इव प्रतिक्षेत्रम्
प्रतिकार्यं च आहुतिं प्रदातुम्
सर्वतः शून्यहस्तो मन्निकटं प्रसार्यते
अविश्वासस्य चिह्नमङ्कयितुम्
अभियोगे निमज्जति मम
पुष्पकविमानम्
अभिशापं मिश्रयन्ती
क्षपाऽयाति प्रियाधरे

दिवा 'किंवायते' .....

सन्वानस्य अस्वस्थशरीरे,

श्रमः समाप्यते

चरणतः कण्टकाकर्षणे

पादपथसोपानतः शैवालमर्षणे

कर्म आरभ्यते ।

कुमारी वधूयते प्रीतिं नवीकर्तुम्

अतोततो दृष्टिः निवर्त्तते ।

विवेको विस्मरति निजवृत्तिम्

वल्मीको विहरति,

अङ्गनायाः रङ्गवसनेषु

चरवृत्तिः निरस्यते इन्द्रियप्रीतिषु
अपनीतौ राज्यं विभज्यते
प्रशासकः प्रजायते अरण्यतः
प्रजामेधयज्ञे
मन्त्रो भवति घुणप्रियः
नवीकृतसंग्रहालयेषु
अनुरोधो वृथा अत्र
संकल्पो हि उदरस्य भर्त्ता

मार्गनिवासः

मार्गेऽस्मिन् निर्मितो निवासः
अनेकशः ·.....
नानारङ्गे चित्रितो बहुशः
खञ्जनस्य अञ्जनमिव
परितोऽद्य सारः .....स्मृतिशेषः ।
सदनं विद्यते सत्यम्
छदिः खेदाय कल्पते
अलसनयने लीलायते स्वप्नः
मलयस्य ताले ताले
नृत्यमभ्यस्यति
प्रणवस्य स्पन्दनमिव
प्रणयस्य प्रथमनिनादः ।
न पक्षी रचयति नीड़मिह
न क्लान्तप्राणी विश्राम्यति

प्रियप्रतीक्षा च अप्रिया भवति
आन्तरविद्रोहे मनो मुमूर्षते ।
प्रत्यूषस्य पर्युषितचन्द्रः
स्मरति पूर्णिमाया अभिषेकमिह
पथिक इव प्रतिष्ठते
नाना स्पर्शः ना ना च सुरभिः,
स्थलभागे मत्स्यस्य ....
सद्योमरणमिव
नाम निह्नूयते कथाया नेपथ्ये ।
अनुभूतसमयस्य स्नेहो निवर्त्तते
पुनः सकृत् एकाकीविधातुम्,
विन्दूयते नीलवह्निः पुरः
स्वरूपस्य सत्यापनकृते..... ।

कति तापाः कियन्तो मेघाः

स्वप्नो ना ना विषयाश्च नाना
तथापि मनो न बुध्यति
विलापे कीदृशी वा प्रीतिः विलीयते
गोपालकच्छत्रे कथं वा गोधूलिः
लीलामातनुते .....
त्वमायासि.....
कुज्झटिकाच्छन्न चन्द्रशरीरतः
त्वमायासि .....
अस्तंगमसूर्यलिप्तमेघवलयतः
कति तापाः कियन्तश्च मेघाः
स्नपयन्ति त्वामिह केवलम्
सकृदवलोकयितुम्
त्वन्नयने अपरब्रह्माण्डम् ।

तथापि मनो न बुध्यति
का सा संध्या वन्दनीया मन्दहासे...?
का वा पूजा अञ्जलिमञ्जुला .. ?
हृदि भारो भूयान् अद्य
त्वद्दारप्रणयी
चेतश्च चकोरायते
त्वदरण्यलावण्यानुनयी
दशा तु असितव्रती नैकमितिहासम्
तथापि मनो न बुध्यति
तापेऽस्मिन् किं वा प्रतिफलम् ?
मेघेऽस्मिन् किं वा परिमलम् ?
अतिवृष्टिं वा अनावृष्टिं वा

यथा विभेति कृषकः
आतितापं निरातापं वा
यथा कश्चिद् बकः
तथाऽहम्.....
न बकः न तु वा कृषकः ।
नवीभवति पुरतः
काकपिकबकानां काकलिः
केलिकला कुतुहले
पुनश्च हसति कलिः
रससरसि सारसः
भ्रश्यति आत्मनः संगीतम्
सुदीर्घविरहे प्रियो विपच्यते
अनुतापे उच्छिष्टमेव परिशिष्टायते ।
तथापि न मनो बोद्धुं प्रभवति

अन्तराले तापो नीलो वा धवलः ?
छायादाने मेघः कृष्णो वा धूसरः ?
परं त्वमायासि……
शीतार्त्ततारकानेत्रतः
पुनस्त्वमायासि
शरत् सरित् प्रवाहतः
पुनरपि रतितले मौलिकीविधातुम् ।

कुज्झटिका रञ्जयति कुञ्जम्

प्राप्ये विरहः
योग्ये च वियोगः
अयोगस्तु युगायते
कथा संजायते कथंभवा
तथैव व्यथा प्रथायते ।
योगीभूय रोग आगच्छति
लिपिकस्य लिखनीतः
दानं समाप्यते, परम्
परिग्रहो रसालो भवति
प्रार्थनायाः स्वादसङ्गमूले
प्राप्यं यदि न मिलेदिह
आशा वा कीदृशं फलेत् ?
ईर्षा वर्षति पापानि

नेतिकारे मिथ्या विपणीयति
विकल्पेषु विद्या विनश्यति
साधारणे रणः शोणायते ।
कुज्झटिका रञ्जयति कुञ्जम्
मञ्जरी म्लायति पुरतः
आषाढस्य रङ्गमाला
तरङ्गान् नवीनीकरोति
स्रोतसि च भ्रमिः विलुप्यते
नामृतं लभ्यते मन्थनात्—
मूढः स्यां वा मुग्धः स्याम्
यानोपविष्ट सहयात्री इव
स्वयमहं व्यवहितः

झरीमर्मरम्

अत्र तु अनेरोधो विरोधाय एव
प्रार्थना कदर्थकारिणी
वचनं न यथार्थवाचकम्
नयने च वस्तु न वास्तवम्
सामान्यवचने जीर्णं विशेषकथनम् ।
अद्य तु तमसायां नश्यति तारका
नेतिकारे नानायते मिथ्या
धूमः शून्यायते, परम्
धूमरङ्गो विरमति यथा
उर्णनाभिजाले
तथा अद्य मनोवृत्तिः
संकल्पे उत्साहो नश्यति

चिरायते साक्षात्कारः
लक्ष्यं दूरायते
देहश्च दुर्वहो भवति ।
नयने बुद्बुदा धमने मिलन्ति
संख्यायते न पुनराकृतिः
विरहे जननं विरहे च स्थितिः
पुनश्च विरहे शेषपरिणतिः ।
आशायामुज्ज्वलायसे...
तथापि त्वमेव 'अलका'
यथैका वन्याविभीषिका ।
झरोगर्भे पाषाणांशः
निर्माति मर्मरम्
मधुरेण मधुरीविधातुम्,
परं न जाने कोऽयमंशः
हृदये मे पाषाणायते.....?

कोऽयं वा पाषाणः!
अपस्वनैः सृजति आवर्तम्
दहनाय.....पुनर्दहनाय.....?
तथापि न जाने कोऽयमंशः
प्रतिनमस्कारम्.....
अञ्जलिषु प्रीतिं विमथ्नाति ।

अञ्चलतरंगे

अधरे किशलयरागः
रङ्गाय न पर्याप्तो भवति
नयने रहस्यं न रसायते
आसरो न मधुमान् इतः
निह्नतिर्न पुलककारिणी
अनुभवे काकभाषा
भूषायते प्रशंसारूपेण
प्रतिबिम्बे वयसः प्रभावः पतति ।
ईश्वरो न म्रियते पुनश्च
अहंकारतले.....
यथा पर्वतगर्भे पाषाणः
नाशास्ते जननं कदाचित् ।

तथापि न समाप्यते
मेघो गगनतः —
उपकूले न पवनो हीनः
तथापि पावकः शेषवह्निकणः ।
कश्चिद् भोक्ता कश्चित् कर्त्ता
अहं तु घटनया जीर्णः
ममाङ्गे पुलको जङ्गमः
न जाने कस्मिन् अङ्गवाससि ते
लुक्कायन्ते शरच्चुम्बनानि
न जाने कोऽयं ललितगन्धस्ते
संध्यायते अञ्चल तरङ्गे ।

अशेषशेषांशः

निलिमसरसीजले
तव पीतवसनस्य अंशेषशेषांशः
लीलां रचयति मयि
नयने भासते प्रत्यूषप्रसरः
लोभनीयो भवति
हिमैषी होमाग्निः
मनोऽभिलषति
चिराय जीवितुमिह
अवलोकयितुं पुनः
रूपपायि किशोरस्य
शेषमुहूर्त्तानि ।
शयनाय वेला समायाति
मैनतरूमूले

शय्या संजायते
संध्या मधुरपूजा यथा
उदारचरिता.....
गुणगुणिभेदो विलोप्यते
अमावास्या भरति तमसाम्
सहसा मम पिपासासु
अऋतुशपथे कस्मिन्
त्वं पुनः मधु संजायसे
प्राच्यस्य मे विचारचषके

मेघः समायाति

मेघः समायाति
क्षालयितुं केदारकबरीम्
वर्षीयान् सः पुनश्च वर्षति
अभिषिच्य आषाढ़बदरीम्
मेघधारे प्लवङ्गमः
पुनः कोऽपि जङ्गमः —
सङ्गमस्य रविरस्तङ्गमः
तथापि वधूमुखे स्मितं मधु मधु
यथा तदयं कुमुदीयो विधुः ।
मेघः पुनश्च ललितः
यामिनी कपोले……अचले……विचले
आसिक्तवसनस्य आसक्त कल्लोले ।
पुनर्मेघः कलुषीकरोति कलसीम्

अबलाया अभिलाषे
मदालसे ..... रासरसे.....
अशेष विलासे..... ।
पुनरपि मेघमार्गे
कस्य निवासो विवशः
अवसरे नटवरो विरहे विरसः ।
मेघः समायाति .....
दरिद्रललनाया हरिद्रवदने
बुद्बुदा गलन्ति .....
अनभिज्ञबालिकायाः
कृशकेशधारे
अनुकम्पासंप्रसारे
देहकम्पः सम्भवत् सम्पद्यते
वारिधारा नीहारायते
प्रापयितुं पापमालाम्
सायंकालकलिकागलके ।

मेघः पुनः समायाति
शीतार्त्तकैवर्त्तस्य जाले
पल्वलीभवितुम् .....
कस्मिन्नेकगभीरप्रदेशे ।
सप्तर्षीणामस्तरंगे
मदर्थं तु मेघश्चित्रलेखा
पूर्णिमायाः निरीहनयने
कज्जलस्य रेखा

तथापि बलाका

रजनीसंज्ञायां ज्योत्स्ना दिगम्बरी
पर्याकुलविन्दुर्यथा तारका सुन्दरी
किंचित् सुप्तिः, किंचिल्लुप्तिः
पुनश्च मनाग् अपह्नुतिः
सरस उरसि नीहारिकारतिः
नीरलहरीषु स्वादूनि भरति ।
अहं तु आषाढ़ इह
गोधूलिजलदे त्वमेव
तथापि बलाका..... ।
पुरतो नीहारिका
पुरतः तुहिनपताका
परितश्च काराराका
कारा..... राका.....

मस्तके संसारकरका ।
तथापि त्वदर्थमुपायनी
मन्निकटे अञ्जलिरेका
तन्मध्ये कलिका
अमलिना आलयिनी रेखा
काले काले मयि अहमिका

हिमनभः

महाशृङ्गे भृङ्गायते
गाङ्गेय शृङ्गारी
रङ्गाधरः परं पुनश्चभङ्गुरः
नहि भोक्तुं न वा त्यक्तुमिह
किंचित् सुसंचितम्
केवला बलवती व्यथा
अभावे भावविलिम्पिता ।
बलाबल कलहतले
रात्रिः भयङ्करी
यात्री तु उदरंभरिः —
किंच— किंचन— किंचित्कारे
शय्या संकोचमञ्चति

हाहाकारे स्वाहाकारः
असह्यो भवति—
तथापि तरलतारातः
शान्तिर्निझरति.....
सहार्पणे कणशः कणशः
न पुनः रसो निष्पद्यते .....
अर्पणं तु दर्पणे व्यवधानमिव ।

अनेकान्तः

गीतिमें रीतिरता भीतिवाहिनी
महामोहे तु मही मोहिनी
निर्जलजलददले
न पवनः तथापि पावनः
पवमानो विपिने विपन्नः ।
परस्परे परा परा
अतिपुरा परम्परा
कर्मणः पुनरागमः
पुनर्निम्नं गमः — ।
परिचयचयनोषु
इवायते विभा
विभुरिव अभावविभवे..... ।
देहि ..... देहीति दहनविशेषा

निशा ईशायते निकषा निकषा
तथापि न आशा कृशकेशा ।
सरणिस्तु रणस्य विशाखा
एका एका समान्तररेखा ।
अवान्तरवृत्तान्तकान्तारे
क्लान्तो हन्त ! अहमनेकान्तः ।



तरंगरंगः

वृष्टेरनन्तरम्
सकलं च समतलम्
निदाघोपनदीमध्ये
सैकतमिव ।
चैत्रवासे.....जैत्रहासे
पतत्रिणो नेत्रवृत्तरासे
अनुकणे
अमुमितनूपुरनिक्वणे
त्वमिह तु
उद्यतचिबुकस्य चुम्बनमिव ।
व्यवधाने—
कतिपयमृदुशब्दाः
पुनश्च निमीलननीरवता

सद्योऽहमनयोः मध्यस्थः
उदकीयन्
शुष्कबालुकासु
तरङ्गस्य चिह्नमिव
लुक्कायितुं लपनं मे
कस्मिन्नेककोमलपुलिने !

सहमयः

संग्रहनिमित्तमद्य गृहं ग्राहायते
कीटकुटुम्बस्य पर्यटने
द्वेषकोटिः कोटिशः कोटिशः
पाण्डवीयरणकुण्डे
परमाणुः पुण्डरीकायते —
तथापि सरोवरे वरीयसी
रसिका सारसी
असितवाससि साक्षात्
शाश्वततापसी ।
मुनिदण्डे कमण्डलुः प्रियमण्डनः
मुखमण्डले जरत्कालः केलिखण्डनः
अनुभवे क्षणखण्डः तथापि दुर्दण्डः ।
नयने तु भूरिभारो भावः प्रवहति
सिन्धुमोहे विन्दुवत्

बन्धुमोहे इन्दुवत्
अहं तु तथापि न जाने
कस्मिन्नेकस्मिन्
अतस्मिन् तन्मये
मन्मये प्रियोऽस्मि
सहमयोऽस्मि .....
शुद्धोऽस्मि ..... बुद्धोऽस्मि
अनावद्धोऽस्मि..... ।



कवेः कृतयः

१- प्रणय प्रदीपम् (काव्यम्)
२- हृदयेश्वरी (कविताचयम्)
३- महातीर्थम् ,,
४- भिन्नपुलिनम् ,,
५- ईशा ,,
६- निम्नपृथिवी (लघुकथागुच्छम्)
७- दिशा विदिशा ,,
८- तिलोत्तमा (उपन्यासः)
९- मधुयानम्- ,,
१०- आवर्तम् ,,
११- शीतलतृष्णा ,,
१२- प्रतिपद् ,,
१३- निकषा ,,
१४- अरुणा ,,
१५- अञ्जलिः ,,
१६- शिखा ,,
१७- पताका (बालोपन्यासः)
१८- महान् (बालकथा)
१९- REFERENCE; A LOGICO-LINGUISTIC IDENTIFICATION.
२०- RELATIONS IN REPRESENTATIVE IDENTIFICATION.
(Based on philosophy, Logic and Linguistics)

विद्वन्मणिः केशवचन्द्रः

अन्यतमस्रष्टा। अभिनवकविः। सांप्रतिकसंस्कृतसाहित्ये विशिष्टचिन्तकः। भाषायां सरलता अस्य रसिकता। प्रसन्नो भावबन्धः अस्य विषयबिलासः। बिम्बविन्यासे अस्य दार्शनिको चेतनैव चमत्कृतिः। अस्य शैली प्रगतेः स्वागतिका।

इदानीम् अलकायाः प्रकशने आत्मानं प्रचुरीकरोति लोकभाषा प्रचार समितिः।

—संपादकः